**त्रिवली(लि)** स्त्री त्रिगुणिता व(ली)वलिः। १उदरस्थे बलीत्रये “त्रिवलीवलयोपेतां भ्रुकुटीभीषणाननाम्” दुर्गाध्यानम्। तिसृणां बलीनां समाहारः। २त्रिवलि तत्रार्थे न० उज्ज्वलदत्तः। [तस्य बलीत्रयवत्त्वात्तथात्वम्।

**त्रिवलीक** न० तिस्रो बल्यो यत्र कप्। पायौ हेम०।

**त्रिबाहु** पु० त्रयो बाहवोऽस्य। १रुद्रानुचरभेदे “त्रिबाहुः पञ्चबाहुश्च व्याघ्रवक्त्रः सितानन:” हरिवं० २७७ अ०। २असियुद्धाकारभेदे। “त्रिबाहुस्तुङ्गबाहुश्च” हरिवं ६१६ अ०। खड्गशब्दे २४६० दृश्यम्।

**त्रिभ** न० त्रयाणां भानां राशीनां समाहारः। १लग्नादिराशित्रये। “त्रिभं त्रिभं लग्नभतः क्रमेण स्त्रीणां नृणां रात्रिदिनेषु तेषु” नील०ता०। २राशित्रयमाते च। “हृत्रिभग्रहजक्रान्तिभागघ्नाः क्षेपलिप्तिकाः” सू०सि०। त्रीणि भानि नक्षत्राणि यत्र। ३नक्षत्रत्रययुक्ते “कार्त्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम्। अन्त्योपान्त्यौ पञ्चमश्च त्रिभं मासत्रयं स्मृतम्” सू०सि०। “अत्र कार्त्तिकाद्यादित्वेन षष्ठादन्त्य आश्विनः उपान्त्यः भाद्रः पञ्चमः फाल्गुनः। मासत्रयं त्रिभिः स्मृतम्। रेवत्यश्विनीभरणीतिनक्षत्रयसम्बन्धादाश्विनः। शततारापूर्वोत्तराभाद्रपदेति नक्षत्रयसम्बन्धाद्भाद्रपदः पूर्वोत्तरफाल्गुनीहस्तेति नक्षत्रययोगात् फाल्गुनः” रङ्गना०।

**त्रिभङ्गी** स्त्री “प्रथमं यदि दशमं वदति विरामं तदनु निकामं वसुकम्। वसुविमलतरङ्गममतिहृदयङ्गमहृषितभुजङ्गमन्तपतिलकम्। त्रिंशद्विकलासुविहितनिवासं सततविलासं हृदयसदेति मदसदितभुजङ्गी मोहनरङ्गी वदति त्रिभङ्गीद्दत्तमदः” इत्युक्ते मात्रावृत्ते छन्दोभेदे।

**त्रिभजीवा** स्त्री ६त० राशित्रयधनुराकारक्षेत्रस्य जीवायाम् त्रिज्यायां त्रिज्याशब्दे दृश्यम्। “शङ्कुः सत्रिभजीवाघ्नः” सू० सि०। त्रिभज्याप्यत्र। “त्रिभज्यया भवेच्छङ्कुस्तद्वर्गं परिशोधयेत्” सू० सि०।

**त्रिभण्डी** स्त्री त्रीन् वातादिदोषान् भण्डति भण्ड–परिभाषणे अण्। त्रिवृति (तेओड़ि) अमरः।

**त्रिभद्र** न० त्रिषु दन्तक्षतालिङ्गनमर्द्दनेष्वपि भद्रं यत्र। सुरते त्रिका०।

**त्रिभाग** पु० तृतीयो भागः वृत्तौ संख्याशब्दस्य पूरणार्थत्वम्। तृतीये भागे “त्रिभागशेषासु निशासु च क्षणम्” कुमा०। “अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्य्यात् दिने दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा” ११४०ब्रह्मपु०।

**त्रिभानु** पु० तुर्वसुवंश्ये नृपभेदे। “तुर्वसोस्तु सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान्। त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः” भाग० ६।२३।४।

**त्रिभाव** पु० त्रिषु कालेषु भावोऽस्य। त्रैकालिके पदार्थे तस्य भावः कर्म वा ब्राह्मणा० ष्यञ्। त्रैभाव्य तद्भावादौ न०।

**त्रिभुक्ति** पु० त्रिषु भुक्तिरस्य। (तीरहुत) देशभेदे त्रिका०।

**त्रिभुज** न० त्रयो भुजा यत्र। त्रिबाहुके त्रिकोणे क्षेत्रभेदे क्षेत्रशब्दे दृश्यम्। “त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्ध्या” “स्पष्टं त्रिभुजे फलं भवति” लीला०। “योनिं कृत्वा त्रिभुजं शयानः” अथ० ८।६। अत्र योनिं त्रिभुजमिव कृत्वेत्यर्थः तेन न क्लीवत्वम्। अतः त्रिभुज् इति शब्दान्तरकल्पनं प्रामादिकम्।

**त्रिभुवन** न० त्रयाणां भुवनानां लोकानां समाहारः पात्रा० न ङीप्। त्रिलोक्यां मिलितेषु स्वर्गमर्त्यपातालेषु। “त्रिभुवनजये सा पञ्चेषोः करोति सहायताम्” सा०द०। “त्रिभुवनगुरोर्धाम चण्डीश्वरस्य” मेघ०।

**त्रिभूम** पु० तिस्रो भूमयः ऊर्द्ध्वाधोमध्यस्था अस्य अच् समा०। (तेताला) प्रासादभेदे।

**त्रिमण्डला** स्त्री लूताभेदे “लूतास्तु द्विविधा स्मृताः” “तासामष्टौ कृच्छ्रसाध्यावर्ज्यास्तावत्य एव तु। त्रिमण्डला तथा श्वेता कपिला पितिका तथा। आलमूत्रविषा रक्ता कमला चाष्टमी स्मृता। ताभिर्दष्टे शिरो दुःखं कण्डूर्दंशे च वेदना। भवन्ति च विशेषेण गदाः श्लैष्मिकवातिकाः”। “त्रिमण्डलया दंशेऽसृक् कृष्णं स्रवति दीर्य्यते” इति च सुश्रु०।

**त्रिमद** पु० त्रिगुणितो मदः संज्ञात्वात् कर्म०। “विद्यामदो धनमदस्तथैवाभिजनो मदः। एते मदा मदान्धानां त एव हि सतां दमाः” १इत्युक्ते गर्वत्रये “नूनं नृपाणां त्रिमदोत्-पथानां मही मुहुश्चालयतां चमूभिः” भाग० ३।१।४३। २मुस्ताचित्रकविडङ्गेषु च वैद्यकम्।

**त्रिमधु** न० त्रिगुणितं मधु संज्ञात्वात् कर्म्म०। “दुग्धं सिता माक्षिकञ्च विज्ञेयं मधुरत्रयम्” इत्युक्ते १दुग्धादित्रये। २ऋग्वेदैकदेशे पु० ३तद्व्रतभेदे तदाचरणेन ४तद्दोध्यायिनि पु०मिता० “मधुवाता इति त्रयः मधुशब्दा यत्र। मधुवाता इत्यादिके ५ऋक्त्रये पु०। “वेदार्थवित् ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः” याज्ञ०। “त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित्” मनुः। ६मधुशब्दत्रये च